# श्री सुरसरस्वती सभा शृङ्गेरि

# तृतीया परीक्षा

# प्रथमपत्रिका

दिनाङ्कः – 02/02/2014 अङ्काः - 100

पूर्वाह्णे –10.00 तः 1.00 पर्यन्तम् समयः – घण्टात्रयम्

**1. एकेन वाक्येन संस्कृतभाषया उत्तरं लिखत**

1) वाग्देवता स्वहस्तेषु किं किं धारयति ?

वाग्देवता स्वहस्तेषु स्फटिकमणिमयीम् अक्षमालां, सितं पद्मम्, शुकम्, पुस्तकं च धारयति ।

2) कालिदासः कस्य सभायामासीत् ?

कालिदासः भोजभूपालस्य सभायामासीत् ।

3) विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?

विक्रमः योगिनमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास ।

4) एकलव्यः कः ?

एकलव्यः हिरण्यधनुषः निषादराजस्य पुत्रः ।

5) वृक्षस्योपरि का स्थिता ?

वृक्षस्योपरि काचित् बलाका स्थिता ।

6) मल्लस्य नाम किम् ?

मल्लस्य नाम वज्रजङ्घः ।

7) शङ्कराचार्यः कदा अवातरत् ?

शङ्कराचार्यः क्रिस्तीयसप्तमशतके नन्दनसंवत्सरे वैशाखशुक्लपञ्चम्यां तिथौ अवातरत् ।

8) वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?

वृक्षच्छायायां प्रसुप्तः ब्राह्मणः प्रसारितबृहत्फटाटोपभीषणं भुजङ्गं दृष्टवान् ।

9) धीराः कस्मात् पदं न प्रविचलन्ति ?

धीराः न्यायात् पथः पदं न प्रविचलन्ति ।

10)सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?

सर्वे देवाः वागीशं स्तोतुं समुपचक्रिरे ।

**2. द्वित्रैः वाक्यैः संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)**

1) नव गोप्यानि कानि ?

आयुः, वित्तं, गृहच्छिद्रं, मन्त्रम्, औषधसङ्गमौ, दानं, मानावमानौ – इत्येतानि नव गोप्यानि ।

2) कीदृशाय शम्भवे नमः ?

आद्याय, अमिततेजसे, श्रुतिपदैर्वेद्याय साध्याय, विद्यानन्दमयात्मने, त्रिजगतः संरक्षणोद्योगिने, अखिलयोगिभिः ध्येयाय, सुरगणैः गेयाय, मायाविने, सम्यक्ताण्डवसम्भ्रमाय, जटिने शम्भवे नमः ।

3) शुकशावकयोर्नाम किम् ? शावकौ काभ्यां व्यक्रीणात् ?

शुकशावकयोर्नाम रामः दुर्मुखः च इति । शावकौ कस्मैचित् साधवे, कस्मैचन सौनिकाय च व्यक्रीणात् ।

4) पञ्चतन्त्रस्य रचयिता कः ? पञ्चतन्त्राणां नामानि लिखत ।

पञ्चतन्त्रस्य रचयिता विष्णुशर्मा । मित्रभेद – मित्रप्राप्ति – काकोलूकीय – लब्धप्रणाशाऽपरीक्षितकारकाणि चेति पञ्चतन्त्राणां नामानि ।

5) श्रीशङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?

श्रीशङ्कराचार्यैः उदीच्यां दिशि बदर्यां, पूर्वस्यां जगन्नाथे, प्रतीच्यां द्वारकायां, दक्षिणस्यां शृङ्गेर्यां च मठाः स्थापिताः । महता यत्नेनोज्जीवितस्य सद्धर्मस्य स्थिरप्रतिष्ठार्थं तैः मठाः स्थापिताः ।

6) विद्यार्थी चेत् किं त्यजेत् ? सुखार्थी किं त्यजेत् ?

विद्यार्थी चेत् सुखं त्यजेत् । सुखार्थी चेत् विद्यां त्यजेत् ।

**3. संस्कृतभाषया उत्तरं लिखत । (त्रयाणामेव)**

1) हनुमान् कः ? सः समुद्रस्योपरि किं किं चकार ?

हनुमान् पवनात्मजः । सः समुद्रस्योपरि मैनाकं समुल्लङ्घ्य, सुरसां जित्वा, सिंहिकां हत्वा, ततः समुद्रस्य पारं प्राप ।

2) विष्णुशर्मणः प्रतिज्ञा का ?

विष्णुशर्मणः प्रतिज्ञा – 'अहं विद्याविक्रयं न करोमि । तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमि । नाहमर्थलिप्सुर्ब्रवीमि । ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किंचिदर्थेन प्रयोजनम् । किन्तु, त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि । तल्लिख्यतामद्यतनो दिवसः' इति ।

3) षड्दोषाः के ?

निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता चेति षट् दोषाः । अभिवृद्धिं कामयता मनुष्येण एते षट् दोषाः त्यक्तव्याः ।

4) राक्षसाः के ?

कश्चन दुर्जनः विद्यया विमलया अलङ्कृतः चेदपि सदसि तस्य न प्रवेशः कारणीयः । यतोहि विद्यावन्तश्चेदपि कुमार्गे गच्छन्तः ते राक्षसा एव भवन्ति । इत्थञ्च असन्मार्गं अनुसरन्तः ये विद्यावन्तः पुरुषाः तेऽपि राक्षसाः भवन्ति ।

**4. मातृभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (त्रयाणामेव)**

1) 'विक्रमस्यौदार्यम्' इति कथायाः सारांशं लिखत ।

ವಿಕ್ರಮಾರ್ಕನು ಭೂಮಂಡಲವನ್ನು ಆಳುತ್ತಿರಲಾಗಿ ಯೋಗಿಯೊಬ್ಬನು ಉಜ್ಜಯಿನಿಗೆ ಬಂದನು. ಆತನ ಪ್ರಸಿದ್ಧಿಯನ್ನು ಕೇಳಿದ ರಾಜನು ಅವನನ್ನು ಆಹ್ವಾನಿಸಲು ತನ್ನ ಪುರೋಹಿತನಾದ ತ್ರಿವಿಕ್ರಮನನ್ನು ಕಳುಹಿಸಿದನು. ಆತನ ಆಹ್ವಾನವನ್ನು ನಿರಾಕರಿಸಿದ ಯೋಗಿಯು ಹೀಗೆ ನುಡಿದನು –

**अशीमहि वयं भिक्षाम् आशावासो वसीमहि ।**
**शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ इति ।**

ಋಷಿಮುನಿಗಳಾದ ನಾವು ಭಿಕ್ಷಾನ್ನವನ್ನು ಊಟ ಮಾಡುತ್ತೇವೆ, ದಿಗ್ವಸ್ತ್ರಧಾರಿಗಳಾಗಿರುತ್ತೇವೆ, ಭೂತಲದಲ್ಲಿ ಮಲಗುತ್ತೇವೆ. ರಾಜರಿಂದ ನಮಗೇನಾಗಬೇಕು ? ಎಂದು.

ನಂತರ ಸ್ವತಃ ರಾಜನೇ ಯೋಗಿಯ ಬಳಿ ಬಂದು ಅವನೊಡನೆ ಅನೇಕ ಆಧ್ಯಾತ್ಮಿಕವಿಚಾರಗಳನ್ನು ಚರ್ಚಿಸಿದನು. ನಂತರ ಯೋಗಿಯು ವಿಕ್ರಮರಾಜನಿಗೆ ಮುಪ್ಪು

ಹಾಗೂ ರೋಗಗಳನ್ನು ಬಿಡಿಸಿಕೊಳ್ಳುವ ಮಂತ್ರವೊಂದನ್ನು ಉಪದೇಶಿಸಿ ಒಂದು ವರ್ಷಗಳ ಕಾಲ ಈ ಮಂತ್ರವನ್ನು ಜಪಿಸಿ ದೂರ್ವಾಂಕುರಗಳಿಂದ ಹೋಮವನ್ನು ಮಾಡು. ನಂತರ ಪೂರ್ಣಾಹುತಿಯ ಸಮಯದಲ್ಲಿ ಹೋಮಕುಂಡದಿಂದ ಪುರುಷನೊಬ್ಬನು ಕೈಯಲ್ಲಿ ಹಣ್ಣನ್ನಿಟ್ಟುಕೊಂಡು ಹೊರಬಂದು ನಿನಗೆ ಅದನ್ನು ನೀಡುವನು. ಅದನ್ನು ಸೇವಿಸಿದ ನೀನು ಮುಪ್ಪು ಮತ್ತು ರೋಗವರ್ಜಿತನಾಗಿ ವಜ್ರಶರೀರಿಯಾಗುವೆ ಎಂದು ನುಡಿದು ತನ್ನಿಚ್ಛೆಯಂತೆ ಹೊರಟು ಹೋದನು.

ರಾಜನು ಅವನ ಮಾತಿನಂತೆಯೇ ಮಂತ್ರವನ್ನು ಜಪಿಸಿ ಹೋಮಮಾಡಿ ಪೂರ್ಣಾಹುತಿಯನ್ನು ಮಾಡಿದನು. ಆ ಸಮಯದಲ್ಲಿ ಹೋಮಕುಂಡದಿಂದ ಪುರುಷನೊಬ್ಬನು ಹೊರಬಂದು ರಾಜನಿಗೆ ದಿವ್ಯಫಲವನ್ನು ನೀಡಿದನು. ಅದನ್ನು ಸ್ವೀಕರಿಸಿ ಕೃತಕೃತ್ಯನಾಗಿ ರಾಜಮಾರ್ಗದಲ್ಲಿ ಬರುತ್ತಿರುವಾಗ ಕುಷ್ಠವ್ಯಾಧಿಗ್ರಸ್ತನಾದ ಬ್ರಾಹ್ಮಣನೊಬ್ಬನನ್ನು ಕಂಡನು. ಬ್ರಾಹ್ಮಣನು ರಾಜನನ್ನು ಕುರಿತು ತನ್ನ ದೇಹಮು ಆರೋಗ್ಯದಿಂದ ಕೂಡಿರುವಂತೆಯೂ, ಅನುಷ್ಠಾನಕ್ಕೆ ಯೋಗ್ಯವೂ ಆಗುವಂತೆ ಕೃಪೆಮಾಡು . ಏಕೆಂದರೆ –

**राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।**
**राजा पिता च माता च राजा चार्तिहरो गुरुः ॥**

ಬಂಧುಗಳಿಲ್ಲದವರಿಗೆ ರಾಜನೇ ಬಂಧು; ಅಂಧರಿಗೆ ರಾಜನೇ ಕಣ್ಣು; ರಾಜನೇ ತಾಯಿ; ರಾಜನೇ ತಂದೆ; ರಾಜನೇ ದುಃಖೋಪಶಮನ ಮಾಡುವ ಗುರು' ಎಂದು. ಅವನ ಮಾತನ್ನು ಕೇಳಿದ ರಾಜನು ಆ ದಿವ್ಯಫಲವನ್ನು ಅವನಿಗೇ ನೀಡಿದನು. ಹೀಗೆ ವಿಕ್ರಮರಾಜನ ಔದಾರ್ಯಮು ಲೋಕೋತ್ತರವಾಗಿತ್ತು.

During King विक्रमार्कs reign, a sage visited उज्जयिनी. Hearing the sage's fame, the king sent his purohit त्रिविक्रम to invite him. Having said 'No' to the invitation the sage thus replied -

**अशीमहि वयं भिक्षाम् आशावासो वसीमहि ।**
**शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ इति ।**

Being a sage we eat food by asking alms, we don't desire clothes, we sleep on the ground. What work do we have with the King?

Later the king himself came in search of sage and discussed spiritual matters with him. The sage thought a hymn to king विक्रमार्क for remaining young and ailment free life. The sage said, "For one year chant the hymn and perform यज्ञ from dry grass (दूर्वाङ्कुर). At the time of पूर्णाहुति a man will appear from होमकुण्ड holding a fruit in his hand and will offer it to you. After eating it your body will be free from ailments and old age". Having said so the sage walked away.

The king followed the instructions of the sage by chanting the hymn and performing the यज्ञ. At the time of poornahuti, a person appeared and offered a fruit. The king received it with great satisfaction and walked towards his palace. On the way he saw a Brahmin suffering from leprosy. The Brahmin said to the king – Please make my body healthy and fit for performing holy rituals. Because

राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च राजा चार्तिहरो गुरुः ॥

For those who don't have relatives the king is the caretaker/relative; for a blind person king acts as the eye; King is mother; King is father; King is the teacher who suffices the misery.

After hearing his words, the king gave the fruit to the Brahmin. Thus the generosity of King विक्रमार्क was great.

2) 'पतिव्रतायाः माहात्म्यम्' अस्य पाठस्य सारांशं लिखत ।

ಸಾಂಗೋಪಾಂಗವಾಗಿ ವೇದಾಧ್ಯಯನವನ್ನು ಮಾಡಿದ ಕೌಶಿಕನೆಂಬ ಬ್ರಾಹ್ಮಣನು ಒಮ್ಮೆ ಮರವೊಂದರ ಕೆಳಗೆ ಕುಳಿತುಕೊಂಡು ವೇದಾಧ್ಯಯನದಲ್ಲಿ ನಿರತನಾಗಿದ್ದನು. ಅಷ್ಟರಲ್ಲಿ ಮರದ ಮೇಲೆ ಕುಳಿತಿದ್ದ ಬಲಾಕಪಕ್ಷಿಯೊಂದು ಆತನ ಮೇಲೆ ಮಲವಿಸರ್ಜನೆಯನ್ನು ಮಾಡಿತು. ಇದರಿಂದ ಕೋಪಾವಿಷ್ಟನಾದ ಆ ವಿಪ್ರನು ಅದರೆಡೆಗೆ ಕ್ರೂರವಾದ ದೃಷ್ಟಿಯನ್ನು ಬೀರಿದನು. ಕೂಡಲೇ ಆ ಪಕ್ಷಿಯು ಅಸು ನೀಗಿತು. ನಂತರ ತನ್ನ ಅಕಾರ್ಯದಿಂದ ಶೋಕಪಟ್ಟವನಾಗಿ ಭಿಕ್ಷೆಯನ್ನು ಬೇಡಲು ಹಳ್ಳಿಯೊಂದಕ್ಕೆ ತೆರಳಿದನು.

ಅಲ್ಲಿ ಒಬ್ಬ ಗೃಹಿಣಿಯ ಮನೆಗೆ ಹೋಗಿ ಭವತಿ ಭಿಕ್ಷಾಂ ದೇಹಿ ಎಂದು ಬೇಡಿದನು. ಗೃಹಿಣಿಯು ಬ್ರಾಹ್ಮಣನನ್ನು ಕಂಡು ಅವನಿಗೆ ಬಿಕ್ಷೆಯನ್ನು ತರಲು ಒಳಗೆ ತೆರಳಿದಳು. ಅಷ್ಟರಲ್ಲಿ ಅವಳ ಪತಿಯು ಹಸಿವಿನಿಂದ ಬಳಲಿದವನಾಗಿ ಮನೆಗೆ ಬಂದದ್ದನ್ನು ಕಂಡು ಅವನ ಶುಶ್ರೂಷೆಯಲ್ಲಿ ನಿರತಳಾದಳು. ಸ್ವಲ್ಪ ಸಮಯದ ನಂತರ ಬ್ರಾಹ್ಮಣನನ್ನು ನೆನೆದು ಭಿಕ್ಷೆಯನ್ನು ತೆಗೆದುಕೊಂಡು ಹೊರಬಂದಾಗ ಕ್ರೋಧತಪ್ತನಾಗಿದ್ದ ಬ್ರಾಹ್ಮಣನನ್ನು ಕುರಿತು ತನ್ನನ್ನು ಕ್ಷಮಿಸೆಂದು ಕೇಳಿದಳು. ಇದರಿಂದ ಸಮಾಧಾನಗೊಳ್ಳದ ಬ್ರಾಹ್ಮಣನು ಅವಳನ್ನು ಕೆಂಪಾದ ಕಣ್ಣುಗಳಿಂದ ಸುಟ್ಟುಹಾಕುವಂತೆ ನೋಡಿದನು.

ಆಗ ಆ ಸಾಧ್ವಿಯು ಅವನಿಗೆ ಪತಿವ್ರತೆಯ ಧರ್ಮವನ್ನು ಬೋಧಿಸಿ, ಬ್ರಾಹ್ಮಣನ ಲಕ್ಷಣವನ್ನು ವಿವರಿಸುತ್ತಾ ಧರ್ಮಿಷ್ಠನೂ, ಸ್ವಾಧ್ಯಾಯನಿರತನೂ, ಶುಚಿಯೂ ಆಗಿದ್ದು ಯಾರು ಕಾಮಕ್ರೋಧಾದಿಗಳನ್ನು ವಶಮಾಡಲಿಲ್ಲವೋ ಆತನು ಬ್ರಾಹ್ಮಣನಲ್ಲವೆಂದು ನುಡಿದು, ಧರ್ಮಸ್ವರೂಪವನ್ನು ಮಿಥಿಲಾನಗರಕ್ಕೆ ತೆರಳಿ ಧರ್ಮವ್ಯಾಧನ ಬಳಿ ತಿಳಿಯಬೇಕೆಂದು ಸಲಹೆಯನ್ನು ನೀಡಿದಳು.

ಹೀಗೆ ಪತಿವ್ರತೆಯ ವಿನಯಪೂರ್ಣ ನುಡಿಗಳನ್ನು ಆಲಿಸಿದ ಕೌಶಿಕನು ಅವಳಿಂದ ಆತಿಥ್ಯವನ್ನು ಸ್ವೀಕರಿಸಿ ಧರ್ಮವ್ಯಾಧನನ್ನು ಭೇಟಿಯಾಗಲು ಮಿಥಿಲೆಗೆ ತೆರಳಿದನು.

Having learnt the vedas efficiently, a Brahmin by name कौशिक was involved in his studies sitting beneath a tree. On the tree a बलाक bird was sitting and it excreted on him. By this action the Brahmin became very upset and looked at the bird with anger. The bird died instantly. Later feeling guilty about his action he went to the village to ask for alms.

He went to a women’s house and asked for alms. Having seen the Brahmin the lady went inside to get alms for him. At the same time her husband returned home struck with hunger, the lady attended her husband. After some time she returned to give alms to the Brahmin and asked for his forgiveness for making him wait. Without forgiving the lady, the Brahmin looked at her with great anger.

Then the lady educated him about the duties of a wife. Also, explained the qualities of a Brahmin- one who is follows धर्म, involves in his own knowledge gaining, being clean yet does not control his anger such a person cannot be a Brahmin. She asked him to go to city of मिथिल and meet धर्मव्याध for better understanding of धर्म.

Thus listening to the humble words of the lady, कौशिक accepted her hospitality and proceeded to meet धर्मव्याध at मिथिल.

3) चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

ಚಿತ್ರಗ್ರೀವನು ಕಪೋತರಾಜನನು. ಒಂದು ದಿನ ಒಬ್ಬ ಬೇಡನು ಶಾಲ್ಮಲಿ ಮರದ ಕೆಳಗೆ ಅಕ್ಕಿಯ ಕಾಳುಗಳನ್ನು ಹರಡಿ, ಬಲೆಯನ್ನು ಬೀಸಿ, ಸ್ವಲ್ಪ ದೂರದಲ್ಲಿಯೇ ಅಡಗಿಕೊಂಡನು. ಅದೇ ಸಮಯದಲ್ಲಿ ಚಿತ್ರಗ್ರೀವನೆಂಬ ಪಾರಿವಾಳಗಳ ರಾಜನು ತನ್ನ ಪರಿವಾರದೊಡನೆ ಆಗಸದಲ್ಲಿ ಹಾರುತ್ತಾ ಅಕ್ಕಿಯ ಕಾಳುಗಳನ್ನು ನೋಡಿದನು. ಆಗ ಆ ಚಿತ್ರಗ್ರೀವನು ಅಕ್ಕಿಯ ಕಾಳುಗಳಿಗೆ ಆಸೆಪಟ್ಟ ಪಾರಿವಾಳಗಳಿಗೆ ಹೇಳಿದನು – ಈ ನಿರ್ಜನವಾದ ಕಾಡಿನಲ್ಲಿ ಅಕ್ಕಿಯ ಕಾಳುಗಳಿರಲು ಹೇಗೆ ಸಾಧ್ಯ? ಇದರಲ್ಲಿ ಒಳ್ಳೆಯದನ್ನು ನಾನು ಕಾಣುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಚೆನ್ನಾಗಿ ಯೋಚಿಸಿ. ಚಿಂತಿಸದೇ ಯಾವುದೇ ಕೆಲಸವನ್ನು ಮಾಡಬಾರದು. ಏಕೆಂದರೆ –

**सुजीर्णमन्नं सुविचक्षणः सुतः**
**सुशासिता स्त्री नृपतिः सुसेवितः ।**

**सुचिन्त्य चोक्तं सुविचार्य यत्कृतं**
**सुदीर्घकालेऽपि न याति विक्रियाम् ॥ इति**

ಚೆನ್ನಾಗಿ ಜೀರ್ಣವಾದ ಅನ್ನ, ಬುದ್ಧಿವಂತನಾದ ಮಗ, ಸರಿಯಾಗಿ ನಿಯಂತ್ರಿಸಲ್ಪಟ್ಟ ಹೆಣ್ಣು, ಚೆನ್ನಾಗಿ ಸೇವಿಸಲ್ಪಟ್ಟ ರಾಜ, ಚೆನ್ನಾಗಿ ಯೋಚಿಸಿ ಹೇಳಿದುದು, ಚೆನ್ನಾಗಿ ಯೋಚಿಸಿ ಮಾಡಿದುದು– ಇವೆಲ್ಲವೂ ಬಹಳ ಕಾಲಾನಂತರವೂ ಕೂಡ ವಿಕಾರವನ್ನು ಹೊಂದುವುದಿಲ್ಲ.

ಇದನ್ನು ಕೇಳಿ ಅಹಂಕಾರಿಯಾದ ಒಂದು ಪಾರಿವಾಳವು ದರ್ಪದಿಂದ ನುಡಿಯಿತು –

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।**
**सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥**

ಕಷ್ಟಕಾಲ ಬಂದಾಗ ಮಾತ್ರ ವೃದ್ಧರ ಮಾತುಗಳಿಗೆ ಕಿವಿಗೊಡಬೇಕು. ಯಾವಗಲೂ ಅವರು ಹೇಳುವುದನ್ನು ಕೇಳುತ್ತಾ ಕೂತರೆ ಆಹಾರವೂ ದೊರಕುವುದಿಲ್ಲ ಎಂದು.

ಹೀಗೆ ಆ ಎಲ್ಲ ಪಾರಿವಾಳಗಳೂ ಚಿತ್ರಗ್ರೀವನ ಮಾತನ್ನು ಧಿಕ್ಕರಿಸಿ ದುರಾಸೆಪೂರಿತ ಮನಸ್ಸಿನಿಂದ ಕೆಳಗಿಳಿದು ಬಲೆಯಲ್ಲಿ ಸಿಕ್ಕಿಕೊಂಡವು. ಆಗ, ಯಾರ ಮಾತಿನಿಂದ ಕೆಳಗಿಳಿದು ಬಲೆಯಲ್ಲಿ ಸಿಕ್ಕಿಬಿದ್ದವೋ ಆ ಹಕ್ಕಿಯನ್ನು ಎಲ್ಲವೂ ನಿಂದಿಸಲಾರಂಭಿಸಿದುವು. ಏಕೆಂದರೆ –

**न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।**
**यदि कार्यविपत्तिः स्यात् मुखरस्तत्र हन्यते ॥**

ಒಂದು ಗುಂಪಿಗೆ ಮುಂದಾಳಾಗಿ ಹೋಗಬಾರದು. ಕೆಲಸ ಫಲಿಸಿದರೆ ಎಲ್ಲರಿಗೂ ಫಲವು ಸಮನಾಗಿ ದೊರೆಯುತ್ತದೆ, ಕೆಲಸ ಕೆಟ್ಟಲ್ಲಿ ಮುಂದಾಳಿಗೇ ನಿಂದೆ.

ಅವರ ನಿಂದೆಯನ್ನು ಕೇಳಿ ಚಿತ್ರಗ್ರೀವನು ಬೇರೆಯವರನ್ನು ನಿಂದಿಸುವುದರಿಂದೇನು ಪ್ರಯೋಜನ? ಕಷ್ಟಕಾಲದಲ್ಲಿ ಪರಿಹಾರವನ್ನು ಹುಡುಕಬೇಕೆಂದು ಹೇಳಿ ಎಲ್ಲರೂ ಒಂದಾಗಿ ಬಲೆಯನ್ನು ತೆಗೆದುಕೊಂಡು ಹಾರಿಬಿಡುವಂತೆ ಸಲಹೆಯನ್ನು ನೀಡಿದನು. ಈ ಹಿತವಚನವನ್ನು ಕೇಳಿ ಎಲ್ಲ ಹಕ್ಕಿಗಳು ಬಲೆಯನ್ನು ಎತ್ತಿಕೊಂಡು ಹಾರಿದವು. ಬೇಡನು ದೂರದಿಂದಲೇ ಬಲೆಯನ್ನು ತೆಗೆದುಕೊಂಡು ಹೋಗುವ ಹಕ್ಕಿಗಳನ್ನು ನೋಡಿ ಅವುಗಳ ಹಿಂದೆ ಓಡುತ್ತಾ ಚಿಂತಿಸಿದನು ಮತ್ತು ಅವುಗಳು ದೃಷ್ಟಿಯಿಂದ ದೂರವಾದಾಗ ಆ ಬೇಡನು ದುಃಖಿತನೂ ನಿರಾಶನೂ ಆಗಿ ಈ ಶ್ಲೋಕವನ್ನು ಪಠಿಸಿದನು –

**नहि भवति यन्न भाव्यं, भवति च भाव्यं विनापि यत्नेन ।**
**करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥**

ಆಗಬೇಕಾದದ್ದು ಯಾವುದೇ ಪ್ರಯತ್ನವಿಲ್ಲದೆ ಆಗಿಯೇ ತೀರುತ್ತದೆ. ಆಗಲಾರದ್ದು ಎಷ್ಟು ಪ್ರಯತ್ನಿಸಿದರೂ ಸಿದ್ಧಿಸುವುದಿಲ್ಲ. ಯಾವುದಕ್ಕೆ ಪ್ರಾಪ್ತಿಯಿಲ್ಲವೋ, ಅದು ಕೈಗೆ ಬಂದರೂ ನಶಿಸುತ್ತದೆ.

ನಂತರ ಅವೆಲ್ಲವೂ ಕಾಡಿನಲ್ಲಿದ್ದ ಆಪ್ತಮಿತ್ರನಾದ ಇಲಿರಾಜನ ಬಳಿಗೆ ಬಂದು ಬಲೆಯಿಂದ ಬಿಡಿಸಿಕೊಂಡು ತಮ್ಮ ತಮ್ಮ ಗೂಡನ್ನು ಪ್ರವೇಶಿಸಿದುವು. ಹೀಗೆ ಚಿತ್ರಗ್ರೀವನು ತನ್ನ ಬಳಗವನ್ನು ರಕ್ಷಿಸಿದನು.

चित्रग्रीव was the king of pigeons. One day a hunter spread rice grains and covered it with net under a शाल्मलि tree and hid in a certain distance. In the meantime चित्रग्रीव with his fellow pigeons was flying in the sky and saw the grains. The fellow pigeons wanted to eat the grains. चित्रग्रीव told to them – In this uninhabited forest how can the grains be seen? There is something fishy. Think properly. Without thinking do not act, because -

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ इति

Properly digested food, an intelligent son, a well-controlled lady, a king well-served, a thoughtful word and a thoughtful deed go a long way.

Listening to this, an arrogant pigeon said -

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥

The words of the old men should be taken only at the times of difficulty. If we go on thinking like this one follow elder always we cannot even have our food

Thus all the pigeons neglected चित्रग्रीव's words, being greedy, descended and were caught in the net.

न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यात् मुखरस्तत्र हन्यते ॥

Never be leader to a group. If the work turns to be successful the fruit is shared equally among all. If the work fails, then the leader is held responsible.

Having heard the blame, चित्रग्रीव said –What is use of blaming at present?

Take courage at difficult times and suggested that lets all together fly along with the net. The pigeons followed his words and flew away. The hunter having followed them for a long distance thought -

नहि भवति यन्न भाव्यं, भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥

‘What is destined not to happen does not happen. If it is to happen, it does happen without any effort. If something is not to happen, even the thing that has come to his hands is lost’.

Then all of them went to the mouse, a close friend, staying in the forest, being relieved of the net by him, all of them entered to their nests. Thus चित्रग्रीव saved his fellow pigeons.

4) विष्णोराकारः कीदृशः ? सः कैः ध्यानगम्यः ?

ವಿಷ್ಣುವು ಶಾಂತಸ್ವರೂಪನೂ, ಆದಿಶೇಷನ ಮೇಲೆ ಮಲಗಿರುವವನೂ, ಹೊಕ್ಕಳಲ್ಲಿ ಕಮಲವನ್ನು ಹೊಂದಿರುವವನೂ, ದೇವತೆಗಳ ಒಡೆಯನೂ, ನಿಖಿಲಜಗತ್ತಿಗೆ ಆಧಾರಭೂತನೂ, ಆಕಾಶದಂತೆ ವಿಶಾಲನೂ, ಮೋಡದಂತೆ ಕಪ್ಪು ಬಣ್ಣವುಳ್ಳವನೂ, ಮಂಗಳಮಯವಾದ ಅಂಗವುಳ್ಳವನೂ, ಲಕ್ಷ್ಮಿಯ ವಲ್ಲಭನೂ, ಕಮಲದಂತಹ ಕಣ್ಣುಗಳುಳ್ಳವನೂ ಆಗಿದ್ದಾನೆ. ಹಾಗೂ ಯೋಗಿಗಳಿಂದ ಧ್ಯಾನಗಮ್ಯನಾಗಿದ್ದಾನೆ.

I bow down to that omnipresent Lord नारायण, who has a serene form, who is asleep on a bed of snake, who has a lotus in his navel, who is the Lord of Gods, who is the support of this world, who is vast like the sky and black like the cloud, who possesses auspicious limbs, who is the husband of Goddess लक्ष्मि, whose eyes resemble a lotus, who is attained by yogin-s through meditation, who removes the fear of the mortal world, and who is the master of the entire universe.

**5. ससन्दर्भं विवृणुत । (चतुर्णामेव)**

**1) स च वेदवेदाङ्गवित् ।**

कः पाठः ?

विक्रमस्यौदार्यम् इति पाठः ।

कः अवदत् ?

लेखकः अवदत् ।

कं प्रति अवदत् ?

पाठकान् प्रति अवदत् ।

कदा अवदत् ?

उज्जयिनीं प्रति आगतस्य योगिनः महिमानं वर्णयन् लेखकः एवम् अवदत् ।

**2) तस्य चक्षुषी विदारयत ।**

कः पाठः ?

आहारशुद्धौ सत्त्वशुद्धिः इति पाठः ।

कः अवदत् ?

दुर्मुखः शुकः अवदत् ?

केभ्यः अवदत् ?

अन्येभ्यः पक्षिभ्यः अवदत् ।

कदा अवदत् ?

यदा द्विजः न्यग्रोधपादपस्य छायायां विश्रमितुकाम आगच्छत्, तदा तं दृष्ट्वा दुर्मुखः अन्यान् पक्षिणः प्रति एवम् अवदत् ।

**3) शरप्रयोगे बलवत्तरः भविष्यति ।**

कः पाठः ?

एकलव्यस्य गुरुभक्तिः इति पाठः ।

कः अवदत् ?

द्रोणः अवदत् ।

कं प्रति अवदत् ?

एकलव्यं प्रति अवदत् ।

कदा अवदत् ?

यदा एकलव्यः अस्त्राभ्यासाय द्रोणस्य समीपमागतः, तदा निषादकुमारमेकलव्यं शिक्षयितुम् अनिच्छन् द्रोणः एवम् अवदत् ।

**4) अत्र स्थित्वा वयं निहताः ।**

कः पाठः ?

विकत्थनस्य मल्लस्य कथा इति पाठः ।

कः अवदत् ?

पौराः अवदन् ।

कं प्रति अवदत् ?

राजानं प्रति अवदन् ।

कदा अवदत् ?

यदा नगरात् समीपस्थे पर्वते व्याघ्रादयो दुष्टप्राणिनः पौरान् बहुधा बाधन्ते तदा पौराः एवम् अवदन् ।

**5) 'नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता' ।**

कः पाठः ?

ब्राह्मणः सर्पश्च इति पाठः ।

कः अवदत् ?

ब्राह्मणः अवदत् ।

कं प्रति अवदत् ?

स्वयं चिन्तयामास ।

कदा अवदत् ?

वृक्षच्छायायां उपविष्टः हरिदत्तो नाम ब्राह्मणः अनतिदूरे वल्मीकोपरि भुजङ्गं दृष्ट्वा उपर्युक्तं वाक्यमचिन्तयत् ।

**6. मातृभाषया अन्वयानुसारम् अर्थं लिखत । (द्वयोरेव)**

1) अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।

षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ॥

**अन्वयः**
अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे भाष्यं कृतवान्, द्वात्रिंशे मुनिरभ्यगात् ।

**अन्वयार्थः**

| | | | |
|---|---|---|---|
| अष्टवर्षे | अष्टमे वयसि | By the eighth year | ಎಂಟನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ |

| | | | |
|---|---|---|---|
| चतुर्वेदी | ऋग्यजुस्सामाथर्वणवेदवित् | Scholar of Rig, Yajur, Sama and Atharvana vedas | ಋಗ್ – ಯಜುಸ್ – ಸಾಮ – ಅಥರ್ವಣಗಳೆಂಬ ನಾಲ್ಕು ವೇದಗಳನ್ನೂ ಕಲಿತು |
| द्वादशे | द्वादशे वयसि | by twelfth year | ಹನ್ನೆರಡನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ |
| सर्वशास्त्रवित् | सकलशास्त्रेषु प्रवीणः | expert in all the shastras | ಸಕಲ ಶಾಸ್ತ್ರ ಪಾರಂಗತರಾಗಿ |
| षोडशे | षोडशे वयसि | in the sixteenth year | ಹದಿನಾರನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ |
| भाष्यं | प्रस्थानत्रयस्य व्याख्यानं | Commentaries (on Prasthanatraya) | (ಪ್ರಸ್ಥಾನತ್ರಯಕ್ಕೆ) ಭಾಷ್ಯವನ್ನು |
| कृतवान् | रचितवान् | composed | ರಚಿಸಿದರು |
| द्वात्रिंशे | द्वात्रिंशे वयसि | in thirty second year | ಮೂವತ್ತೆರಡನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ |
| मुनिरभ्यगात् | (एषः) यतिः अन्तर्हितः | the sage left the world | ಈ ಯತಿಯು ಅಂತರ್ಹಿತರಾದರು |

**भावार्थः**

अष्टमे वयसि ऋग्यजुस्सामाथर्वणवेदानां सारज्ञः, द्वादशे वयसि सकलशास्त्रेषु प्रवीणः, षोडशे वयसि प्रस्थानत्रयस्य व्याख्यानं रचितवान्, द्वात्रिंशे वयसि एषः मुनिः अन्तर्हितः ।

ಎಂಟನೇ ವರ್ಷದಲ್ಲಿ ನಾಲ್ಕು ವೇದಗಳನ್ನೂ ಕಲಿತು, ಹನ್ನೆರಡನೆಯ ವರ್ಷದಲ್ಲಿ ಸಕಲಶಾಸ್ತ್ರಪಾರಂಗತರಾಗಿ, ಹದಿನಾರನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ ಭಾಷ್ಯವನ್ನು ರಚಿಸಿ, ಮೂವತ್ತೆರಡನೆಯ ವಯಸ್ಸಿನಲ್ಲಿ ದೇಹತ್ಯಾಗ ಮಾಡಿದರು.

This sage studied all the four Vedas at the age of eight, was well-versed in all the shastras by twelve, composed Bhashya by sixteen, and left the world at the age of thirty-two.

2) प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।

किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरति ॥

**अन्वयः**

नरः प्रत्यहम् आत्मनः चरितं प्रत्यवेक्षेत । किं नु मे पशुभिः तुल्यं किं सत्पुरुषैः इति ।

**अन्वयार्थः –**

| | | | |
|---|---|---|---|
| नरः | मनुष्यः | man | ಮನುಷ್ಯನು |
| प्रत्यहं | प्रतिदिनं | everyday | ಪ್ರತಿದಿನವು |
| आत्मनः | स्वस्य | His own | ತನ್ನ |
| चरितं | शीलं (प्रति) | character | ನಡತೆಯನ್ನು |
| प्रत्यवेक्षेत | चिन्तनं कर्तव्यम् | Should examine | ಪರಿಶೀಲಿಸಬೇಕು |
| किं मे पशुभिः तुल्यं | किं मे प्राणिभिः समानं | am i equal to an animal | ನಾನು ಒಂದು ಪ್ರಾಣಿಗೆ ಸಮವೇ ? |
| किं सत्पुरुषैः | किं सत्पुरुषसमानं (वा) इति | am i equal to a good person | ನಾನು ಉತ್ತಮ ವ್ಯಕ್ತಿಗೆ ಸಮವೇ ? |

**भावार्थः**

नरः प्रत्यहं स्वस्य शीलस्य विषये समीक्षां कुर्यात् । "किम् अहं पशुभिः समानः वा किं सत्पुरुषसमानः" इति ।

Everyday a man should check his own character completely. "Am I equal to animals or equal to good people" – thus.

ಮನುಷ್ಯನು ಪ್ರತಿದಿನವೂ ತನ್ನ ನಡತೆಯನ್ನು ಪರಿಶೀಲಿಸಬೇಕು – ಅದು ಪ್ರಾಣಿಗಳಿಗೆ ಸಮವಾಗಿದೆಯೋ, ಸಜ್ಜನರಿಗೆ ಸಮವಾಗಿದೆಯೋ ಎಂದು.

3) लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।

सीतां विचन्वन्नद्राक्षीत् निद्राणं निशि रावणम् ॥

**अन्वयः–**

अनिलात्मजः लङ्काधिदेवतां जित्वा तां प्रविश्य सीतां विचिन्वन् निशि निद्राणं रावणम् अद्राक्षीत् ।

**अन्वयार्थः –**

| | | | |
|---|---|---|---|
| अनिलात्मजः | पवनपुत्रः | son of the wind | ವಾಯುಪುತ್ರನು |
| लङ्काधिदेवतां | पवनपुत्रः | goddess of Lanka | ಲಂಕಾಧಿದೇವತೆಯಾದ ಲಂಕಿಣಿಯನ್ನು |
| जित्वा | पराजित्य | Having conquered | ಗೆದ್ದು |
| तां प्रविश्य | लङ्कां प्रविश्य | having entered Lanka | ಆ ಲಂಕಾನಗರಿಯನ್ನು ಪ್ರವೇಶಿಸಿ |
| सीतां विचिन्वन् | जानकीम् अन्विष्यन् | searching for Sita | ಸೀತೆಯನ್ನು ಹುಡುಕುತ್ತಾ |
| निशि | रात्रौ | at night | ಆ ರಾತ್ರಿಯ ವೇಳೆಯಲ್ಲಿ |
| निद्राणं रावणं | सुप्तं रावणं | sleeping Ravana | ನಿದ್ರಿಸುತ್ತಿದ್ದ ರಾವಣನನ್ನು |
| अद्राक्षीत् | ददर्श, अपश्यत् | saw | ಕಂಡನು |

**भावार्थः**

पवनात्मजः लङ्कायाः अधिदेवतां विजित्य, लङ्कां प्रविश्य, जानकीम् अन्विष्यन् रात्रौ सुप्तं रावणं ददर्श ।

ವಾಯುಪುತ್ರನು ಲಂಕಾಧಿದೇವತೆಯಾದ ಲಂಕಿಣಿಯನ್ನು ಗೆದ್ದು ಆ ಲಂಕಾನಗರಿಯನ್ನು ಪ್ರವೇಶಿಸಿ ಸೀತೆಯನ್ನು ಹುಡುಕುತ್ತಾ ಆ ರಾತ್ರಿಯ ವೇಳೆಯಲ್ಲಿ ನಿದ್ರಿಸುತ್ತಿದ್ದ ರಾವಣನನ್ನುಕಂಡನು.

Having won over the presiding deity of Lanka, and on entering Lanka, Hanuman searching for Sita in that night time, saw Ravana, who was sleeping.

**7. श्लोकद्वयं पूरयत –**

1) वागीशाद्याः........................। .......................गजाननम् ।

वागीशाद्यः सुमनसः सर्वार्थानामुपक्रमे ।

यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

2) निन्दन्तु ............................. । .....................न धीराः ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा

न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

3) विद्यया ...............................। .....................राक्षसाः ॥

विद्यया विमलयाऽप्यलङ्कृतो
दुर्जनः सदसि माऽस्तु कश्चन ।
साक्षरा हि विपरीततां गताः
केवलं जगति तेऽपि राक्षसाः ॥

**8. मातृभाषया अनुवादं कुरुत –**

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचित् प्रभाते लघुपतनकनाम वायसः प्रबुद्धः कृष्णवर्णं, ऊर्ध्वकेशं, यमकिङ्कराकारं, व्याधमपश्यत् । तमालोक्याचिन्तयत् – “अद्य प्रातरेवानिष्टदर्शनं जातम् । न जाने किमनिष्टं भविष्यति” इति ।

ಗೋದಾವರಿಯ ತೀರದಲ್ಲಿ ಒಂದು ವಿಶಾಲವಾದ ಶಾಲ್ಮಲಿ ಮರವಿದೆ. ಅಲ್ಲಿ ಬೇರೆ ಬೇರೆ ಪ್ರದೇಶಗಳಿಂದ ಹಕ್ಕಿಗಳು ಬಂದು ರಾತ್ರಿಯಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಒಮ್ಮೆ, ಬೆಳಗಿನಹೊತ್ತು, ಲಘುಪತನಕನೆಂಬ ಕಾಗೆಯು ಎದ್ದು, ಕಪ್ಪಗೆ, ಹರಡಿದ ತಲೆಗೂದಲನ್ನು ಹೊಂದಿದ್ದು, ಯಮಕಿಂಕರನಂತಿದ್ದ ಬೇಡನನ್ನು ನೋಡಿತು. ಅವನನ್ನು ನೋಡಿ ಚಿಂತಿಸಿತು – ‘ಇಂದು ಬೆಳಿಗ್ಗೆಯೇ ಅನಿಷ್ಟದರ್ಶನವಾಯಿತು. ಏನು ಕೇಡಾಗುವುದೋ ತಿಳಿಯೆನು’ ಎಂದು.

There is a huge शाल्मलि tree on the banks of the river गोदावरी. There many birds used to live at night, coming from different countries and directions. One morning, a crow by name लघुपतनक rose up and saw a hunter, who was of black complexion, having long hair, and who was looking like the servant of Lord यम.
Having seen him, it thought – Today I happened to see this unwanted sight early in the morning,
I do not know what bad will happen”.

**9. रिक्तस्थानानि पूरयत –**

1) हस्ते किं ते <u>तालीपत्रम्</u> ।

2) राजा बन्धुः <u>अबन्धूनाम्</u> ।

3) विधिरहो <u>बलवान् इति</u> मे मतिः ।

4) ‘स्था’ धातोः लट् उत्तमपुरुषैकवचनम् <u>तिष्ठामि</u> ।

**10. पर्यायपदानि लिखत । (त्रयाणामेव)**

1) मुखम् - वदनम्, आननम्, तुण्डम् ।

2) भुजगः – सर्पः, उरगः, अहिः

3) ख्यातः - प्रसिद्धः, अलङ्कृतः

4) प्रतिकृतिः – प्रतिमानम्, प्रतिबिम्बम्, प्रतिनिधिः, प्रतिच्छाया

**11. विरुद्धार्थकपदानि लिखत । (त्रयाणामेव)**

1) आद्याय - अन्त्याय

2) दिवा - रात्रिः

3) भद्रम् - अभद्रम्

**12. वाक्यदोषं परिहरत ।**

1) भवान् पाठं पठ ।

भवान् पाठं पठतु ।

2) रामस्य नमः ।

रामाय नमः ।

3) अहं मित्रस्य सह क्रीडामि ।

अहं मित्रेण सह क्रीडामि ।

**13. त्रयाणां वाक्यानि रचयत ।**

1) एत्य – मुकुन्दः शालादेत्य क्रीडितुं गच्छति ।

2) साधयामि – अहं महत्तरं कार्यं साधयामि ।

3) अन्तिकम् – शिष्यः गुरोः अन्तिकं गत्वा कञ्चन विषयं निवेदयति ।

4) सम्यक् – पञ्चवर्षीयः बालः सम्यक् भाषते ।

## 14. क्रियापदमेकं सर्वपुरुषवचनेषु लिखत –

1) वेत्ति

विद्-धातुः, लट्-लकारः, परस्मैपदिरूपाणि

वेत्ति वित्तः विदन्ति

वेत्सि वित्थः वित्थ

वेद्मि विद्वः विद्मः

2) निन्दतु

निन्द-धातुः, लोट्-लकारः, परस्मैपदि-रूपाणि

| | | |
|---|---|---|
| निन्दतु-निन्दतात् | निन्दताम् | निन्दन्तु |
| निन्द-निन्दतात् | निन्दतम् | निन्दत |
| निन्दानि | निन्दाव | निन्दाम |

## 15. त्रयाणां सन्धिं विभज्य नाम लिखत ।

1) सर्वेऽपि = सर्वे + अपि (पूर्वरूपसन्धिः)

2) अतस्तस्य = अतः + तस्य (सकारादेशसन्धिः)

3) रामेति = राम + इति (गुणसन्धिः)

4) अप्येकदा = अपि + एकदा (यणसन्धिः)

## 16. प्रयोगपरिवर्तनं कुरुत ।

1) रामः रावणं हतवान् ।

रामेण रावणः हतः ।

2) पुत्रेण पिता अमन्यत ।

पुत्रः पितरं अमन्यत ।

**17. समूहेतरपदं लिखत ।**

1) अपठन्, कृतवान्, अलिखन्, अगच्छन् – (कृतवान्)

2) आद्याय, रामाय, देवाय, जनकाय – (आद्याय)

3) शुकः, वायसः, कपोतः, पक्षी – (पक्षी)

**18. लोकोक्तिमेकाम् अर्थेन सह विवृणुत ।**

1) क्लेशः .................।

क्लेशः फलेन हि पुनर्नवतां विधत्ते । अतः क्लेशे सति बहु आलापः नैव कर्तव्यः । क्लेशाः मनुष्ये दार्ढ्यमुत्पादयन्ति ।

ಕ್ಲೇಶವು ಫಲಪ್ರಾಪ್ತಿಯಾದಾಗ ಮರೆಯಲ್ಪಡುತ್ತದೆ.

After the desired result is attained, the difficulty/effort (that is put in) gets a novelty.

2) यादृशं भक्षयेदन्नं .................।

यादृशं भक्षयेदन्नं बुद्धिर्भवति तादृशी । अत एवोक्तम् 'आहारशुद्धौ सत्त्वशुद्धिः' इति । ततश्च सर्वदा सात्त्विकाहारस्य सेवनमस्माभिः कर्तव्यम् ।

(ಮಾನವನು) ಯಾವ ರೀತಿಯ ಅನ್ನವನ್ನು ಉಣ್ಣುತ್ತಾನೋ, ಆ ರೀತಿಯ ಬುದ್ಧಿಯು ಉಂಟಾಗುವುದು.

As is the food which is eaten, so will be the intellect.

As the kind of the food that is consumed (सात्विक, राजसिक, तामसिक) so shall be the intellect (सात्विक, राजसिक, तामसिक).

**19. व्याकरणविशेषं लिखत । (एकस्य)**

1) वाग्देव्यै नमः – नमः शब्दयोगे “नमः स्वस्तिस्वाहास्वधाऽलं-वषड्-योगाच्च” इति सूत्रेण चतुर्थी विभक्तिर्भवति । प्रकृते वाग्देवीशब्दस्य नमः शब्दयोगात् चतुर्थी विभक्तिः ‘वाग्देव्यै’ इति ।

2) वायसेन सह – सहशब्दयोगे ‘सहयुक्तेऽप्रधाने’ इति सूत्रेण तृतीयाविभक्तिर्भवति । वायसशब्दस्य सहशब्दयोगात् तृतीया- विभक्तिः ‘वायसेन’ इति ।

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 02/02/2014 अङ्काः - 50

पूर्वाह्ने – 1.30 तः 3.00 पर्यन्तम् समयः – सार्धैकहोरा

**1) दशवाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।**

1) धेनुः

**धेनोः महत्त्वम् –**

समग्रप्रपञ्चे धेनुं को वा न जानाति ? अतीव साध्वी धेनुः मातेवास्मान् रक्षतीति विवेकिनः सर्वे बोधन्ति । स चतुष्पाज्जन्तुः । चत्वारः पादाः, द्वे श्रृङ्गे, लोमयुक्तं लाङ्गूलं, लम्बमाना सास्ना, धवलादयः वर्णाः एते गोः साधारणाः विशेषाश्च अंशाः ।

**उपयोगिता –**

देशीयानां धेनूनां क्षीरं रुच्यं, पथ्यं चेति वदन्ति । सीमाधेनवः बहुक्षीरं यच्छन्ति । परन्तु ताः अल्पया सास्नया युताः महिषीसदृश्यः दृश्यन्ते । धेनवः हम्भारवं कुर्वन्ति । सः ध्वनिः श्रोतुं मधुरतरः ।

धेनोः आहारः अल्पमूल्यः सुलभश्च । सा शाद्वले हरिततृणानि भक्षयति । कासाराणां मधुरं जलं पिबति । गृहे गोपालः शुष्कतृणं, पिण्याकं, बुसं च तस्यै यच्छति । दोहनसमये तस्याः पुरः बुसाधिकं खाद्यं स्थापयति गोपालः । तद् भक्षयन्ती सा मधुरं क्षीरं यच्छति । वत्सः प्रथमं धेनोः स्तनात् दुग्धं पिबति । ततः गोपालः भूमौ उपविश्य वामहस्ते, जानुनोः मध्ये, भूमौ वा पात्रं स्थापयित्वा दक्षिणहस्तेन पात्रे गां क्षीरं दोग्धि । दोहनानन्तरं पुनरेकवारं वत्सं क्षीरपानाय मुञ्चति ।

प्रभातकालः सायङ्कालश्चेति द्वौ दोहनसमयौ । गोपालः उत्तमम् आहारं दत्वा गां पोषयेत् । धेनूनां पालनेन न केवलं जीविका, किन्तु मानववर्गस्यैव महानुपकारो भवति । गोः दुग्धं अतीव मधुरं पथ्यं च भवति । तप्तं दुग्धं कवोष्णं कृत्वा पिबन्ति । आतञ्चनेन क्षीरं दधि भवति । दधि पुष्टिकरमिति सर्वे वदन्ति । दध्नः मथनेन नवनीतं तक्रं च लभ्यते । तापनेन नवनीतं घृतं भवति । घृतेन वर्धते बुद्धिः । एतानि सर्वाणि वस्तूनि मनुष्यस्य आहाररूपाणि । गोमयेन करीषं भवति ।

**पूज्या धेनुः –**

अस्माकं पूर्वजाः गोभक्ताः आसन् । श्रीकृष्णः गोपालनमकरोत् । दिलीपादयः चक्रवर्तिनोऽपि गोसेवामकुर्वन् । गावः विश्वस्य मातरः । वयं सर्वेऽपि गोसेवां करवाम । गोसन्ततेः अभिवृद्धिं करवाम । गोभ्यः स्वस्ति ।

2) दीपावली

दीपावली नामकं पर्व भारते अतीव महत्वं वहति । श्रूयते यत् अस्मीन्दिने त्रेतायुगे मर्यादापुरुषोत्तमः सीतया लक्ष्मणेन च सहितः अयोध्यां नगरीं प्रति निवृत्तः । तदा च तेषां जनैः रात्रौ दीपमालां कृत्वा स्वागतं कृतम् ।ततः प्रभृति सर्वैः भारतीयैः अस्मिन् एव दिने प्रतिवर्षं स्वगृहेषु दीपमाला क्रियते । अस्मिन् दिने एव श्रीकृष्णः नरकासुरस्य वधं अकरोत् इति प्रतीतिः । इदं दिनत्रयं यावत् आचर्यते ।

**लक्ष्मीपूजनम् -**

दीपावलीमहोत्सवे रात्रौ श्रीमहालक्ष्मीपूजा क्रियते । स्थाने – स्थाने वैदिकमन्त्रैः हवनयज्ञादिकम् अपि अनुष्ठीयते । बहवो वणिजः अस्माद्दिनाद् व्यापारस्य आरम्भं कुर्वन्ति । कार्तिकमासस्य अमावास्यायां दीपावलीमहोत्सवः भवति । अस्मिन्दिने गृहाणां विशेषतः शुद्धिः सुधाधवलिता च

क्रियते । गृहं नववधूरिव भासते । यत्र – यत्र शोभा, तत्र – तत्र महालक्ष्मीदेव्याः आगमनं भवति इति मन्यते । महालक्ष्मीदेव्याः पूजानन्तरं तृतीये दिने गोपूजा क्रियते ।

**दीप-प्रकाशः -**

तैलस्य लघुदीपाः पंक्तिशः प्रकाश्यते । अधुना सिक्थवर्तिकानां पंक्तिभिः दीपपङ्क्तीनां स्थानं गृह्यते । विद्युद्दीपाः विविधान् रागान् व्यञ्जयन्ति । बालक – बालिकाभिः विविधरूपाः स्फोटाः विस्फोट्यन्ते । दीपानां प्रकाशेन अमावस्यायाः तिमिरम् आच्छाद्यते । गृहलतासु विटपेषु चापि विविधरागदीपाः विलसन्ति । स्वमित्रबान्धवेभ्यः मिष्टान्नं दीयते । सर्वे परस्परं मिलित्वा सर्वबन्धूनां मङ्गलकामनां कुर्वन्ति ।

3) पुस्तकभण्डारः

**पुस्तकभण्डारस्य महत्त्वम् –**

स्वाध्यायी जनः आत्मशुद्धेः मार्गम् अनुसरति । ज्ञानार्जनस्य बहवः उपायाः सन्ति । तेषु उपायेषु पुस्तकभण्डारः अथवा ग्रन्थालयः सर्वोत्तमः । यतः स्वरुच्यनुसारं तस्मात् स्थानात् पुस्तकानि प्राप्यन्ते ।

**पुस्तकभण्डारस्य स्वरूपम् –**

पुस्तकभण्डारे सर्वविषयकानि पुस्तकानि, पत्रिकाः, समाचारपत्राणि च निधीयन्ते, सङ्गृह्यन्ते । नराः च स्वरुच्यनुसारं पुस्तकानि गृहीत्वा प्रत्यागच्छन्ति । तान्येव पुस्तकानि अन्यः अपि पठति, ज्ञानस्य अभिवृद्धिं च करोति ।

**पुस्तकभण्डारस्य लाभाः –**

पुस्तकभण्डारात् नैकाः लाभाः भवन्ति । महज्जनानां कृतीनाम् अध्ययनेन वयं तेषां महापुरुषाणां साक्षात्कारमेव कुर्मः । दिवं गताः अपि ते लोकहितकर्तारः निजादर्शरचनाभिः अहोरात्रं प्रेरयन्ति । सहस्रवर्षपूर्वजातानां पुरुषाणाम् अपि परिचयः तेषां पुस्तकानां माध्यमेन सरलतया प्राप्तुं शक्यते ।

**इच्छापूर्तिः –**

पुस्तकानां माध्यमेन जनः सर्वविदां समृद्धिं कर्तुं पारयति । यदि जनः निजव्यवसाये वृद्धिं कर्तुमिच्छति तदा तादृग्विषयप्रबोधिनीं पुस्तिकां पठित्वा निजाभिलाषं पूरयति । भिन्नरुचिर्हि लोकः । यदा जनः मनोरञ्जनम् इच्छति तदा तादृशं पुस्तकं ग्रन्थालयात् लब्धुं शक्यते ।

**शोधकार्ये सहयोगः –**

शोधकार्याय उच्चस्तरीयाध्ययनाय च छात्राः बहुमूल्यपुस्तकानि क्रेतुं न समर्थाः भवन्ति । तेभ्यः छात्रेभ्यः सन्दर्भपुस्तकानि प्रदाय ग्रन्थालयाः तेषां महदुपकारं कुर्वन्ति । यदि वयं समयस्य

सदुपयोगं वाञ्छामः तदा स्वातिरिक्तकाले ग्रन्थालयेषु एव समयस्य यापनं कर्तुं शक्नुमः । तेन जीवने उन्नतिः भविष्यति ।

**2) संस्कृतभाषया पत्रमेकं लिखत ।**

1) अनारोग्यनिमित्तं विरामं प्रार्थयन् कक्ष्याध्यापकं प्रति पत्रं लिखत ।

---

श्रीविद्यावर्धिनी प्रौढशालायाः मुख्योपाध्यायानां सन्निधौ; प्रोढशालायाः नवमकक्ष्यायां पठन् प्रभाकरः, सादरप्रणामपूर्वकं विज्ञापयति ।

मान्याः अध्यापकाः,
अनारोग्यकारणात् अहं शालामागन्तुं न शक्नोमि । अतः कृपया भवन्तः दिनद्वयं यावत् मह्यं विरामं यच्छन्तु । कक्ष्यायाः प्रथमाध्यापकानां संस्कृतपण्डितानां महादेवशास्त्रिणां हस्ताङ्कनं संमतिं च गृहीतवानस्मि ।
मम विरामसमये पाठ्यमानान् पाठान् सुहृत्सकाशे ज्ञात्वाहं पाठक्षतिं संपूरयिष्यामि ।

इति भवतां विधेयः
प्रभाकरः
नवमकक्ष्या प्रथमविभागः

विद्यावर्धिनीप्रोढशाला, महीशूरपूरी

२०.११.१९९३

2) स्व – अध्ययनविषये अग्रजाय / पित्रे पत्रं लिखत ।

क्षेमम् श्रीः

विश्वेश्वरपुरम्
कल्याणनगरी
श्रीमुख कार्तिकशुक्ल द्वादशी
शुक्रवासरे
२६.११.१९९३

परमपूज्यानां पितृचरणानां पादयोः रामशर्मा साष्टाङ्गं प्रणम्य विज्ञापयति ।

अहमत्र कुशली । तत्रापि सर्वे कुशलिनः इति जानामि । भवतां सर्वेषां कुशलपत्रिका तदा तदा विलिख्य प्रेषणीया ।

भवतां पत्रं प्राप्तम् । आयुष्मान् शङ्करः अर्धवर्षीयपरीक्षायां प्रथमश्रेण्यां प्रथमं स्थानं प्राप्तवानिति श्रुत्वा नितरां मोदे । भवन्तः अपि संस्कृतभाषायां नूतनं पुस्तकमेकं विरचितवन्त इत्यहम् आकर्णयामि । तेन महान् मे प्रमोदो जातः । तत्पुस्तकं मह्यं प्रेषयन्तु इत्यभ्यर्थये ।

मम वार्षिकी परीक्षा शीघ्रमेव प्रारप्स्यते । अहं समयं व्यर्थं न करोमि । यावच्छक्ति पठामि । उत्तमकक्ष्यायामुत्तीर्णो भविष्यामीति मम विश्वासः वर्तते ।

मातृचरणयोः मम साष्टाङ्गनमस्काराः वक्तव्याः । शीघ्रं प्रत्युत्तरं लिखतु इति प्रार्थये ।

इति भवतामाशीर्वादाभिलाषी
रामशर्मा,
संख्या४
विद्यार्थिनिलयः
विश्वेश्वरपुरम्
कल्याणनगरी(बेंगलूरु)

पत्रसंङ्केतः
सुन्दरेशः
गृ.सं. ३१/१
महाविपणिवीथी
महीशूरपुरी, पत्रविभागसंख्या ४

**3) द्वयोः लक्षणं स्वोत्तरभाषया लिखत –**

1) उपसर्गाः

द्वाविंशति उपसर्गाः सन्ति यथा – प्र वि परा अप सम् अनु अव निर् निस् दुर् दुस् अति प्रति सु उद् अधि परि अपि आ अभि नि उप ॥

एषः उपसर्गसंग्रहश्लोकः –

प्रविपरापसमन्ववनिर्निसौ दुरतिदुस्प्रतिसूदधिपर्यपि ।
(तदनु) चाङभिनि उपविंशतिर्द्विसहितेत्युपसर्गसमाह्वयः ॥

उपसर्गयोगेण धातूनां अर्थभेदं सञ्जायते यथा – हरति, प्रहरति, संहरति, आहरति, परिहरति ।

तदुक्तं –

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ।
“उपसर्गाः क्रियायोगे” इति सूत्रेण पाणिनिः उपसर्गसंज्ञां विदधाति ।

2) विशेषणम्

*पदार्थे विद्यमानं विशेषं यत् बोधयति तत् विशेषणमिति कथ्यते । यथा -
नीलः मेघः
नीला शाटी
नीलं कुसुमम्
प्रकृते नीलशब्दः मेघे, शाट्याम्, कुसुमे च विद्यमानं गुणविशेषं बोधयतीत्यतः नीलमिति विशेषणवाचकः शब्दः । एवमेव दीर्घ-रक्त-दुष्टादयः शब्दाः गुणम् अथवा धर्मं बोधयन्ति ।

*यस्य विशेषणं दीयते सः विशेष्यः । पूर्वोदाहरणेषु मेघः, शाटी, कुसुमशब्दाः विशेष्याः भवन्ति ।

*विशेष्यवाचकः शब्दः यस्मिन् लिङ्गे, वचने, विभक्तौ च भवति तस्मिन्नेव लिङ्गे, वचने, विभक्तौ च भवति विशेषणवाचकः शब्दः । तदुक्तम् –

यल्लिङ्गः यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा चा विभक्तिः विशेषणस्यापि ॥ इति ।

यथा -
१. उन्नतं वृक्षमारोहति । (वृक्षशब्दानुगुणं उन्नतशब्दस्य पुंल्लिङ्गम्, एकवचनम्, द्वितीयाविभक्तिश्च ।)
२. कठिनायां शिलायामुपविशति ।
३. स्वादूनि फलानि खादति ।

*संख्यावाचकशब्दा अपि विशेषणानि भवन्ति ।

3) क्त्वा – ल्यप्प्रत्ययौ

द्वयोः क्रिययोः यदि समानः कर्ता तदा पूर्वतनक्रियावाचकात् धातोः क्त्वाप्रत्ययः भवति । यथा -

कृ + क्त्वा = कृत्वा
गम् + क्त्वा = गत्वा
पठ् + क्त्वा = पठित्वा
भक्ष् + क्त्वा = भक्षयित्वा
लिख् + क्त्वा = लिखित्वा

सू – समानकर्तृकयोः पूर्वकाले ।

सूत्रार्थः – समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानात् धातोः क्त्वा स्यात् ।

उदा : भुक्त्वा व्रजति । स्नात्वा पिबति ।

धातुः उपसर्गयुक्तश्चेत् क्त्वाप्रत्ययस्य स्थाने ल्यप् आदेशः भवति । ल्यपि यकारमात्रमवशिष्यते । एवमेव धातोरन्ते यदि स्वरवर्णः भवति तदा ल्यबवयवः यकारः 'त्य' इति स्वरूपं भजते । यथा - आगत्य, विलिख्य, उपकृत्य, आदृत्य

**4) त्रिषु पुरुषवचनेषु क्रियारूपाणि लिखत ।**

1) अपश्यन्

दृश्-धातुः, लङ्-लकारः, परस्मैपदिरूपाणि

| | | |
|---|---|---|
| अपश्यत् | अपश्यताम् | अपश्यन् |
| अपश्यः | अपश्यतम् | अपश्यत |
| अपश्यम् | अपश्याव | अपश्याम |

2) गमिष्यति

गम्-धातुः, लृट्-लकारः, परस्मैपदिरूपाणि

| | | |
|---|---|---|
| गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| गमिष्यः | गमिष्यथम् | गमिष्यथ |
| गमिष्यम् | गमिष्याव | गमिष्याम |

3) मोदताम्

मुद्-धातुः, लोट्-लकारः, आत्मनेपदिरूपाणि

| | | |
|---|---|---|
| मोदताम् | मोदेताम् | मोदन्ताम् |

| | | |
|---|---|---|
| मोदस्व | मोदेथाम् | मोदध्वम् |
| मोदै | मोदावहै | मोदामहै |

**5) एकस्य शब्दरूपाणि सर्वविभक्तिवचनेषु लिखत ।**

1) राजन्

नकारान्तः पुल्लिङ्गः राजन् शब्दः

| | | |
|---|---|---|
| राजा | राजानौ | राजानः |
| हे राजन् | हे राजानौ | हे राजानः |
| राजानं | राजानौ | राज्ञः |
| राज्ञा | राजभ्याम् | राजभिः |
| राज्ञे | राजभ्याम् | राजभ्यः |
| राज्ञः | राजभ्याम् | राजभ्यः |
| राज्ञः | राज्ञोः | राज्ञाम् |
| राज्ञि | राज्ञोः | राजसु |

2) मातृ

ऋकारान्त-स्त्रीलिङ्गः मातृशब्दः

| | | |
|---|---|---|
| माता | मातारौ | मातारः |
| मातारं | मातारौ | मातॄन् |
| मात्रा | मातृभ्यां | मातृभिः |
| मात्रे | मातृभ्यां | मातृभ्यः |

मातुः मातृभ्यां मातृभ्यः

मातुः मात्रोः मातॄणाम्

मातरि मात्रोः मातृषु

3) युष्मद्

दकारान्त-त्रिलिङ्गः युष्मद् शब्दः

| | | |
|---|---|---|
| त्वं | युवाम् | यूयम् |
| त्वां-त्वा | युवाम्-वां | युष्मान्-वः |
| त्वया | युवाभ्यां | युष्माभिः |
| तुभ्यं-ते | युवाभ्यां-वां | युष्मभ्यम्-वः |
| त्वत् | युवाभ्यां | युष्मत् |
| तव-ते | युवयोः-वां | युष्माकम्-वः |
| त्वयि | युवयोः | युष्मासु |

**4) वाक्यदोषान् परिहरत –**

1) देवस्य नमः ।

देवाय नमः ।

2) वत्सः धेनोः सह गच्छति ।

वत्सः धेन्वा सह गच्छति ।

3) बालाः क्रीडाङ्गणे खेलति ।

बालाः क्रीडाङ्गणे खेलन्ति ।

**5) कृदन्ताव्ययं चित्वा नाम लिखत ।**

1) रामो वनं गत्वा दैत्यान् समहरत् ।

गत्वा - क्त्वाप्रत्ययः

2) छात्राः श्लोकान् पठितुम् आरभन्ते ।

पठितुम् - तुमुन्प्रत्ययः

3) अहं उत्तरं विलिख्य पठामि ।

विलिख्य - ल्यप्प्रत्ययः

**6) अन्यलिङ्गरूपं लिखत । (त्रयाणां)**

1) पठितवान् – पठितवती ।

2) पुत्री – पुत्रः ।

3) एतस्य – एतस्याः ।

4) शिक्षकः – शिक्षिका ।

**7) वाक्यमेकं कर्णाटकभाषया आङ्लभाषया वा विवृणुत ।**

1) यथा बीजं तथा अङ्कुरः ।

ಬೀಜದಂತೆ ಮೊಳಕೆಯು ಇರುತ್ತದೆ. ಅರ್ಥಾತ್ ಬಾಲ್ಯಾವಸ್ಥೆಯಲ್ಲಿ ಯಾವ ರೀತಿಯ ಸಂಸ್ಕಾರವು ಸಿಗುತ್ತದೆಯೋ ಹಾಗೆಯೇ ಮನುಷ್ಯನು

ರೂಪುಗೊಳ್ಳುತ್ತಾನೆ. ಆದ್ದರಿಂದ ಬಾಲ್ಯದಲ್ಲಿ ಮಕ್ಕಳಿಗೆ ಉತ್ತಮವಾದ ಸಂಸ್ಕಾರವನ್ನು ನೀಡಬೇಕು.

The sprout will be like the seed. The child will shape up into an adult with the values he/she has been taught in childhood. Hence, we should teach good values to the kids.

2) नास्ति मातृसमो बन्धुः ।

ತಾಯಿಗೆ ಸಮನಾದ ಬಂಧುವಿಲ್ಲ. ತಾಯಿಯು ಗುರುವಾಗಿ, ಗೆಳತಿಯಾಗಿ, ಬಂಧುವಾಗಿ ಮಕ್ಕಳ ಎಲ್ಲಾ ಕರ್ತವ್ಯಗಳನ್ನು ಪೂರೈಸುವಳು.

There is no better relative than a mother. A mother acts as a teacher, friend, well-wisher to the child and full fills all her responsibilities.

**8) मातृभाषया अनुवादं कुरुत ।**

1) मृगाः अहाराय चरन्तु ।

ಪ್ರಾಣಿಗಳು ಆಹಾರಕ್ಕಾಗಿ ಅಡ್ಡಾಡಲಿ.

Animals roam for food.

2) विद्यार्थिनः संस्कृतभाषायां वदेयुः ।

ವಿದ್ಯಾರ್ಥಿಗಳು ಸಂಸ್ಕೃತದಲ್ಲಿ ಮಾತನಾಡಬೇಕು.

Students must talk in Sanskrit.

3) देवः सर्वत्र वसति, सः सर्वव्यापी ।

ದೇವರು ಎಲ್ಲಾ ಕಡೆ ವಾಸಿಸುತ್ತಾನೆ ಮತ್ತು ಅವನು ಸರ್ವವ್ಯಾಪಿ.

God is present everywhere, he is omniscient.

4) वयं कुसुमैः देवमर्चयामः ।

ನಾವು ಹೂವುಗಳಿಂದ ದೇವರನ್ನು ಪೂಜಿಸುತ್ತೇವೆ.

We worship god with flowers.

**9) संस्कृतभाषया अनुवादं कुरुत –**

1) ಹುಡುಗರು ಮಿಠಾಯಿಗಳಿಂದ ಸಂತೋಷಿಸಿದರು.

The boys enjoyed with sweetmeats.

बालकाः मोदकैः अनन्दन् ।

2) ನಾವು ಪರೋಪಕಾರಕ್ಕಾಗಿ ಜೀವಿಸೋಣ.

Let us live for helping others.

वयं परोपकाराय जीवाम ।

3) ಬುದ್ಧಿವಂತನಾದ ಪುರುಷನು ಸುಖದಿಂದ ಜೀವಿಸುತ್ತಾನೆ.

An intelligent person lives happily.

बुद्धिमान् पुरुषः सन्तोषेण जीवति ।

4) ವಿದ್ಯಾಭ್ಯಾಸಕ್ಕಾಗಿ ಕಷ್ಟಗಳನ್ನು ಸಹಿಸಿರಿ.

Endure the difficulties for the sake of learning.

विद्यार्जनार्थम् आपदः सहध्वम् ।

5) ನಾಳೆ ನನ್ನ ಹುಟ್ಟುಹಬ್ಬವು ನಡೆಯುವುದು.

My birthday will take place tomorrow.

मम जन्मदिनं श्वः भविष्यति ।